National Journal of Hindi & Sanskrit Research

# श्रीरामाश्वमेधीयमहाकाव्ये कैकेयाः चरितम्

**ISSN: 2454-9177**
NJHSR 2019; 1(22): 17-19
© 2019 NJHSR
www.sanskritarticle.com

**सौम्यश्री बिश्वालः**
शोधछात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः

**Correspondence:**
**सौम्यश्री बिश्वालः**
शोधछात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,तिरूपतिः

**सौम्यश्री बिश्वालः**

रामस्य अयनं रामायणम्। रामायणमादिकाव्यं प्रायः बहुनां काव्यानाम् आधारभूतं भवति। रामायणं महाभारतवत् कश्चिदितिहासग्रन्थो भवति । संस्कृतसाहित्ये रामायणवत् प्रसिद्धः लोकप्रियश्च अन्यः ग्रन्थः नास्तीति वक्तुं शक्यते। पितृधर्मस्य पतिपत्नीधर्मस्य भ्रातृधर्मस्य तथा अन्यकौटुम्बिकधर्मस्य च आदर्शभूतोऽयं ग्रन्थः। आदिकाव्यस्य रामायणस्य कर्ता श्रीमद्वाल्मीकिः ।

रामकथायाः रचयिता महर्षिवाल्मीकिः कृष्णद्वैपायनव्यासादि प्राचीनकवयः एवं सन्तशीरोमणि गोश्वामि-तुलसीदासः केशवः, राष्ट्रकवि मैथिलीशरणगुप्तादि अर्वाचीनकवयः स्व स्व रचनासु रामं प्रति कैकेय्याः प्रीतिभावानां बहुधा वर्णितवन्तः यथा स्वपुत्रस्य भरतस्यापेक्षया कैकेयी कौशल्यापुत्रं श्रीरामं प्रति अत्यधिक स्नेहशीला आसीत् इति । मन्थरायाः कुमन्त्रेणां श्रुत्वा महाराज्ञी कैकेयी दशरथात् वरद्वयं प्राथितवती च तत्र प्रथमवरत्वेन भरतस्य राज्याभिषेकः, द्वितीयवरत्वेन श्रीरामचन्द्रस्य चतुर्दशवर्षाणां वनगमनम् । तेन कारणेन कैकेयी रामविरोधिनी इति प्रचारः।
अयं प्रसङ्ग रामायणे यथा -

रामायणे महाराजः दशरथः श्रीरामं युवराजपदे अभिषेक्तुं यदा ईप्सितवान् चयनं कुर्वन् आसीत् तदा परिचारिकायाः मन्थरायाः कुमन्त्रणेन महाराज्ञी कैकेयी दशरथं पूर्वनिर्धारितं वरद्वयं स्मारितवती ।
यथा –

**स्मर राजन् पुरा वृत्तं तस्मिन् देवासुरे रणे।**
**तत्र त्वां च्यावयच्छत्रुस्तव जीवितमन्तरा।**
**तत्र चापि मया देव यत् त्वं समभिरक्षितः।**
**जाग्रत्या यतमानायास्ततो मे प्रददौ वरौ।।**[1]

अनेन प्रकारेण वरद्वयं स्मारयित्वा राज्ञी कैकेयी वरद्वयं प्राप्तुम् ऐच्छत्। प्रथम वररूपेण स्वपुत्रस्य भरतस्य राज्याभिषेकः। यथा-

**अभिषेकसमारम्भो राघवस्योपकल्पितः।**
**अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम्।।**[2]

द्वितीयतः श्रीरामस्य चतुर्दशवर्ष वनवासगमनम्। यथा-

**नव पञ्च वर्षाणि दण्डकारण्यमाश्रितः।।**
**चीराजिनधरो धीरो रामो भवतु तापसः।**
**भरतो भजतामद्य यौवराज्यमकण्टकम्।।**[3]

अस्मिन् प्रसङ्गे "श्रीरामाश्वमेधीयमहाकाव्यस्य" रचयिता महाकवि सत्यनारायणशास्त्री स्वबुद्धिवैभवं प्रदर्श्य नवीनरुपेण उपस्थापयति । तस्य मतानुसारेण महाराज्ञी कैकेयी श्रीरामं प्रति प्रभूता स्नेहशीला आसीत्। सा सदेव श्रीरामाभ्युदयस्य कामनां करोति। श्रीरामस्य अलौकिकम् असाधारणं च व्यक्तित्वम् आसीदिति सा समीचीनरूपेण ज्ञातवती ।

यतः युगे युगे भक्तस्य हिताय तस्य आवेगेन भगवान् आवद्ध एव। भक्तानाम् आवश्यकसमये स्वयं भगवान् सहायतां प्रयच्छति । भगवान् भक्तस्य अन्तरङ्गबन्धुरूपेण तेषां सम्मुखे आविर्भूतो भवति। यदा सत्यधर्मन्यायानां विनाशो भवति तस्मिन् समये धरापृष्ठे असौ अवतारं गृहीत्वा अवतीर्णः भवति।

भगवतः अवतारधारणस्य मौलिकलक्ष्यं साधुशिष्टानाम् सुरक्षा, धर्मन्यायस्य रक्षा, असाधूनाम् अधर्मस्य पापानाञ्च निग्रहणम् भवति।

अस्मिन् प्रसङ्गे भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायाम् उक्तवान् यत् –

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।**[4]

पुनश्च महर्षि शुकदेवेन श्रीमद् भागवतमहापुराणे उदाहृतम्–

**यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः।**
**तदा तु भगवानीश आत्मानं सृजते हरिः।।**

एतदर्थं भगवान् श्रीविष्णुः युगे युगे अवतारं धारयित्वा धरापृष्ठे अवतरणं कृतवान् । विश्वव्यापी श्रीमद् भगवान् विष्णुः धर्म संस्थापनार्थाय दुर्जनानां संहारार्थं, साधूनां रक्षणार्थं पृथिव्यां मर्यादायाः स्थापनार्थं च श्रीरामरूपेण अवतीर्णः प्राभूत्।

यदि रामः अयोध्यासाम्राज्यस्य युवराजो भविष्यति तर्हि तस्य अवतारधारणस्य मौलिकलक्ष्यं पूर्णं न भविष्यति इति कैकेयी चिन्तयति । अतः मम अपयशः भवतु अथवा हानिर्भवतु अहं रामस्य उद्देश्यं पूरिपूरणाय सहायिका भवामि इति विचिन्त्य सा दशरथं पूर्वदत्तं वरं याचितवती । श्रीरामं चतुर्दशवर्षाणि वनवासं प्रेषयितुं भरतस्य च युवराजपदे अभिषेकार्थं योजनां कृतवती।

अत्र अवतारधारणस्य उद्देश्यं श्रीरामस्य स्मरणे आसीत् परन्तु स्वपितुराज्ञापालनं एका मर्यादा अस्ति इति चिन्तयित्वा युवराजपदे अभिषेक्तुं स्वीकृतवान् । यदा श्रीरामः मातुः कैकेयायाः योजनाविषये सूचनां प्राप्तवान् तदा सः कैकेयीं प्रति अत्यन्तं कृतज्ञः अभूत् । अपि च पित्राज्ञां स्वीकृत्य लक्ष्मणमैथिल्या च सह वनवासं गतवान् । चतुर्दशवर्षाणां वनवाससमये सज्जनानां रक्षणं तथा दुर्जनानां विनाशादिकार्यं पूर्णं कृत्वा अयोध्यां प्रत्यागतवान्।

परन्तु श्रीरामाश्वमेधीयमहाकाव्यस्य तृतीयसर्गे महाकविना अस्य प्रसङ्गस्य अत्यन्तं मार्मिकं हृदयस्पर्शि वर्णनं रथोद्धताछन्दसा कृतमस्ति।

सिंहासनारोहणानन्तरं श्रीरामः मातरं कैकेयीम् उदास-चिन्तातुरां च विलोक्य अतीव दुःखितः सञ्जातः । एतस्मिन् समये मनस्विनी कैकेयी मनसि दुःखं संस्थाप्य अतिधैर्येण मन्दं मन्दं प्रावोचत् – वत्स, भवता राक्षसराजरावणं विनश्य समस्तलोकानां हितं साधितम्। देवतानां कार्यमपि साधितं तथा अतुलयशः अपि त्वया अर्जितम् । यथा –

**केकयावनिभवा मनस्विनी दुःखपूरमवरुद्ध्य चेतसि।**
**प्राप्य सत्त्वमिव सा शनैः राघवं समभणद्भृशार्दितम्।।**
**वत्स सर्व-जगतो हितं कृतं लोकरावणमपास्य रावणम्।**
**कीर्तिराशिरतुलोऽर्जितस्त्वया देवकार्यमपि साधितं पुनः।।**[5]

वनवासकाले भवता यत् यशः अर्जितं तद् यशः राजभवने स्थित्वा अर्जयितुं शक्यते वा। पश्यतु राजप्रसादे स्थित्वा अपि अहं निन्दिता भर्त्सिता च। पुत्रधातिनी सर्पिणी इति सदृशी मम अपयशः अभवत्। अहं स्वयं मम भर्तुः विनाशस्य कारणमस्मि इति जनाः प्रवदन्ति। यथा-

**काननेऽपि वसता त्वयार्जितं यत् किमर्जयति सौधमास्थितः।**
**पश्यं मां नृपतिसौधवासिनीं सर्वराज्यजनताबहिष्कृताम्।।**
**भर्त्सिता पुरजनैश्च निन्दिता दूषिताऽपयशसा तिरस्कृता।**
**सर्पिणी तनयघातिनी तथा भर्तुनाशकलुषेण लाञ्छिता।।**[6]

मन्त्रिगणाः, कुलगुरुः वशिष्ठः, नागरिकाः, भवनस्य सेवकाः, शत्रुघ्नः तथा मम पुत्रः भरतोऽपि मम विश्वस्य मङ्गलकारि चिन्तनमवगन्तुं प्रयत्नं न कृतवन्तः। समग्रविश्वे भवतः यशसः प्रसारः भवतु इति विचिन्त्य मया एवमाचरितम् । हे राम ! एतस्मिन् प्रसङ्गे मम स्वार्थः कोऽपि नासीत् इति कैकेयी श्रीरामं वदति । यथा –

**राज्यमस्ति न हि वस्तु केवलं यद् यथेच्छमुपयुज्यतां नृपैः।**
**रामयोग्यमुकुटोऽयमर्प्यते मूर्ध्नि हन्त भरतस्य कौचिती।।**
**विश्वलोकपरिधि-स्पृशं यशः पादयोर्लुठतु येन निर्भरम्।**
**तद्विचिन्त्य विपिनं विवासितो राघवो न तु निजार्थपूर्तये।।**[7]

हे राम ! अहमेव सा माता या पुत्रस्य विश्वस्य च मङ्गलं विचिन्त्य सर्वं लोकपवादं श्रुतवती । यथा-

**मां कठोरहृदयां विना तदा लोक-वाद-सहनाय साहसी।**
**कः परो भवितुमर्हति क्षमः स्मेति मां वदतु कोऽपि साम्प्रतम्।।**[8]

हे राम ! पतितजनानां दुःखहरणाय भवतः जन्म । अनेन कारणेन सह परिचिताऽपि तस्मिन् समये यत् आचरणं मया कृतं तदाचारणं रहस्यरूपेण मया संस्थापितम् । एतद् रहस्यं मम पीडाजनकम् आसीत् । यथा –

**आर्तदुःखहरणाय ते जनिं जानती यदहमाचरं तथा।**
**तद्रहस्यमिव रक्षितं मयाऽऽवर्जिता च विनिमन्त्रिता व्यथा।।**[9]

हे राम ! दुर्जनाः सेवकाशच मां निन्दन्तु मम दुःख नासीत्। यं पुत्र मया उदरे धृतः सोऽपि माम् तिरस्करोति स्म।एतस्मिन् सन्दर्भे भरत एव प्रमाणम्। यथा –

**भ्राष्ट्रभर्जनमुपैतु दुर्जनः कूपपातमुपयान्तु सेविकाः ।**
**यो मया स्वजठरे धृतः सुतः सोऽपिमामितरवन्निराकृत।।**[10]

या माता सर्ववन्दनीया, शिशोः आद्या गुरु भवति सा माता शिशोः पितुः अपेक्षया तथा गुरोः अपेक्षयाऽपि सहस्राधिकै गुणैः गौरवशालिनी भवति । स्थितिः एवमासीत् भरतः स्वजन्मदात्रीं मातरं वहु निन्दितवान् । यतः सोऽपि न जानामि स्म सर्वं वृत्तान्तम्। यथा –

**सर्ववन्द्ययतिनाऽपि वन्दनं यार्हति प्रथमदेशिका शिशोः।**
**गौरवैर्दशशतं पितृन् गुरुन् यातिरिच्यत इदं मनूदितम्।।**
**नव्यधर्मनयविद्ब्रुवेण ते बन्धुना नृपतिना परासितम्।**
**जन्मदां प्रति विमुञ्चतादरं नावबुध्य हि तदन्तरव्यथाम्।।**[11]

मातुः युक्तियुक्तं वेदनापूर्णवचनं तथा मातुः विषण्णमुखम् अवलोक्य श्रीरामस्य हृदयं विदीर्णमभवत् । भरतः अपि स्वव्यवहारनिमित्तं पश्चातापं कृतवान् । यथा –

**युक्तियुक्तमतिवेदनाभरं मातुरुक्तिमभिश्रृण्वतस्तदा।**
**पश्यतश्च नयनाश्रुबिन्दुभिर्बिह्वलां मुखविभां मलीमसाम्।।**
**राघवस्य हृदयं व्यकम्पताभ्यागमेऽपि न हि रावणेषुभिः।**
**धर्मधारिधुरिधीधुरीणता मानसाच्च भरतस्य निर्ययौ।।**[12]

रघुनन्दनस्य सम्मुखे स्ववाणीमुपस्थाप्य कौकेय्याः मनः सम्पूर्णरूपेण शुद्धमभवत् यथा चन्द्रग्रहणानन्तरं चन्द्रमा परिशोभते। यथा –

**उद्गीर्य वाग्भिः सह चित्तपीडाकालुष्यमग्रे रघुनन्दनस्य।**
**रराज कैकेय्यमलान्तरात्मोपराग-शुद्धेव तनुर्हिमांशोः।।**[13]

मातुर्वचनं निशम्य तथा तस्याः हृदयस्य विशालतामवगम्य मातरं प्रति पूर्वकृतं स्वव्यवहारनिमित्तम् अत्यन्तं खिन्नरूपेण भरतः क्षमां प्रार्थितवान् । यथा –

**निशम्य मातुर्वचनं विकासि तच्चित्तभावानवगम्य सम्यक्।**
**स्वपूर्वकृत्ये भरतोऽतिखिन्नो जग्राह तस्याश्चरणौ क्षमार्थी।।**[14]

मातापुत्रयोः नयने अश्रुपूर्णो अभूताम् । जनन्याः चरणे भरतः अपतत् क्षमायाचनाञ्च अकरोत्। माता स्वकरकमलं तस्य मस्तके स्थापयित्वा क्षमां कृतवती । यथा –

**पुत्रेण मातुर्मिलनस्य दृश्यं दिदृक्षवः कारुणिकं सहर्षम्।**
**सीतानुजाभिः सह कक्षकक्षादाजग्मुरह्नाय च दासदास्यः।।**[15]

अनेन प्रकारेण महाकविना काव्येऽस्मिन् स्वशब्दचित्रैः महाराज्ञ्याः कैकेय्याः चरित्रचित्रणं कृतम्।

**सहायकग्रन्थसूची –**


१.श्रीमद्वाल्मीकिरामायणम्,महर्षिवाल्मीकिः(हिन्दि - अनुवाद-सहित), गीताप्रेस, गोरखपुरः

२.श्रीरामाश्वमेधीयमहाकाव्यम्,सत्यनारायणशास्त्री, रोहतकः, आचार्य प्रिण्टिङ्ग प्रेस् , २००६

३.संस्कृतसाहित्य का अभिनव इतिहास, राधावल्लभत्रीपाठी, वारणसीः विश्वविद्यालयप्रकाशन(४सं),२०१३

४. श्रीमद्भगवतगीता, गीताप्रेस, गोरखपुर

५.महाभारतम्, रामनारायणदत्तशास्त्रीपाण्डेय, गोरखपुरः, गीताप्रेस।


**सन्दर्भग्रन्थसूची –**


1. रामायणम्-अयोध्याकाण्ड-एकादशसर्गः-१८
2. रामायणम्-अयोध्याकाण्ड-एकादशसर्गः-२४,२५
3. रामायणम्-अयोध्याकाण्ड-एकादशसर्गः-२६,२७
4. श्रीमद्भगवतगीता-अध्याय-४-श्लोकसंख्या-८
5. श्रीरामाश्व-तृतीयसर्गः-१६,१९
6. श्रीरामाश्व-तृतीयसर्गः-२२,२३
7. श्रीरामाश्व-तृतीयसर्गः-२६,२९
8. श्रीरामाश्व-तृतीयसर्गः-३१
9. श्रीरामाश्व-तृतीयसर्गः-३६
10. श्रीरामाश्व-तृतीयसर्गः-३९
11. श्रीरामाश्व-तृतीयसर्गः-४७,४८
12. श्रीरामाश्व-तृतीयसर्गः-४९,५०
13. श्रीरामाश्व-तृतीयसर्गः-८१
14. श्रीरामाश्व-तृतीयसर्गः-८२
15. श्रीरामाश्व-तृतीयसर्गः-८४